# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा –शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम्–४ | गुणाः – ७० |
| विषयः – फलितज्यौतिषम् । | (O.E.- 3.5.5. OLD ) | समयः ३:०० तः ६:०० |
| दिनाङ्कः – १२/१०/२०१९ | सन्दर्भग्रन्थः–केशवीयजातकपद्धति, भावकुतूहलम् । | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) कुजकवी बुधचन्द्रंदिवाकरा–
बुधसितावनिजा गुरुसूर्य्यजौ ।
शनिगुरु च पुरातनपण्डितौ–
रजमुखादुदिता भवनाधिपाः ॥

(२) राहुणा कन्यकादान भानुना हरिकीर्तनम् ।
शिखिनः कपिलादानं मन्दाराभ्यां षडङ्गकम् ॥

(३) वदेन्द्रमन्त्री विधुजं प्रपश्ये
दृगुण सविज्ञं नृपतिं करोति ।
प्रसुतिकाले यदि पञ्चराशौ
चैकोऽपि बाले कुरुते नृपालम् ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(१) ग्रहाणां उच्चनिच्चादि विचारः ।

(२) अरिष्टव्यङ्गविचारः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(१) प्रवासशाली किल दुःखमाली
सदालसी धीधनवर्जितश्च ।
भयातुरः कोपपरो विशेषा–
दिवाधिनाथे गमने मनुष्यः ॥

(२) कौतुकभवनं गतवति शुक्रे
शुक्रेशत्वं सदसि महत्त्वम् ।
हृद्याविद्या भवति च पुंसः
पद्मोदरनिवसति पद्मोदरतः ॥

(३) कृत्तिकादिस्त्रीवृत्त्या दशा विंशोत्तरी मता ।
अष्टोत्तरी न संग्राहा मारकार्थ विचक्षणै ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** **१०**

(१) सूर्यस्यावस्थाफलम् ।

(२) ग्रहाणां बालाद्यवस्थाफलाध्यायः ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु ।** **१०**

(१) मध्यस्पष्टयुतेर्दलोनित चक्रं चेष्टाख्य केन्द्रं कुजात्
स्याच्येतद्भगणाच्च्युतं षडधिकं षड्द्दच्च चेष्टाबलम् ।
स्यादेकोतररूप मद्रिविहतं नैसर्गिकं स्याद्बलम्
मन्दारज्ञसुरेज्यशुक्रराशभृत्तीक्ष्णद्युतीनां क्रमात् ॥

(२) यादांशोत्थकलाः स्वयोग्यगुणकघ्नाः स्वभ्रनेत्रोद्धृता
अंशायुद्युर्सदां समादितुं तनोर्दायांशकास्त्र्याहताः ।
दिण्भक्ता हि समादि चेतु बलवल्लग्नं तदा लग्नभै
स्तुल्याब्दैः सहितं द्विनिघ्नशरहद्भागादितो मासयुक् ॥

(३) लज्जितः पुत्रभावस्थः पुत्रनाश करो मतः
क्षोभितस्तृषितो यस्य सप्तमे स्त्री न जीवति ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत ।** **१०**

(१) ग्रहाणां उच्चबलं विचारः ।

(२) गर्वितादिभावफलम् ।

**संयुक्तान्वितिः**

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **१०**

(१) भावकुतूहलस्य लेखकः कः ?

(२) कति भावाः ?

(३) सुतः इति कस्य भावस्यापरो नाम अस्ति ?

(४) चरसंज्ञकराशयः के ?

(५) केन्द्रम् अर्थात् के भावाः ?

(६) भाग्यः कस्य भावस्यापरो नाम अस्ति ?

(७) यदि चन्द्रात् न धने न व्यये खेटाः भवन्ति तदा कः योगः ?

(८) यस्य करघः तिलगजते तदा किं भवति ?

(९) उन्मतेनोदरेणैव नारी का भवति ?

(१०) विनितस्कन्धा नारी का भवति ?

(११) यस्याः कण्ठः वर्तुलोऽस्ति सा नारी किं भवति ?

(१२) शयनादि कति अवस्थाः सन्ति ?

(१३) चन्द्रस्य द्वादशअवस्थाः शुक्लपक्षे किं भवति ?

(१४) सबलकेन्द्रेशः त्रिकोणपतिनायुतः यत्र कुत्रापि गतः तदा मनुजः किं भवति ?

(१५) यदि लाभेशः केन्द्रस्थो भवति तदास किं फलम् ?

----oooo----